E 730
F. 15

No. १३३ ग-१.

Title अध्यात्म विद्योपदेशविधि.

Author श्री शङ्कराचार्य.

Extent १५ पत्र Age सं. २००१

Subject वेदान्त

No ६३५६ — पत्र १५

नं. १३३

नं १३३ ग-१
अध्यात्मविद्योपदेशविधिः
१५ पत्राणि
देवनागरी
प्रतिलिपि सं. २००१ वि
स्वामी श्रीरामानन्दाचार्य

अथ अध्यात्मविद्योपदेशविधिः प्रारंभः

११-११-२००१

इस पुस्तक के १५ पत्रे हैं

रजिस्टर नं. १२००

अ॰ वि॰ ॐ श्रीगणेशायनमः अथाध्यात्मविद्योपदेशविधिर्लिख्यते सच्चिदा
१ नंदरूपायसर्वधीवृत्तिसाक्षिणे नमोवेदांतवेद्यायब्रह्मणे नंतरूपिणे यदज्ञा
दि॰ दं॰ भा॰ नादिति यज्ज्ञानाद्विनिवर्त्तते नमस्तस्मै चिदानंदवपुषे परमात्मने अथाध्या
त्मविद्योपदेशविधिं व्याख्यास्यामः अध्यात्मविद्याधिकारिणामाह ता
पत्रिभिः क्लिश्यमानानां शान्तानां वीतरागिणां मुमुक्षूणामपेक्षितो यमात्मबो
धो विधीयते अनात्मसु देहादावात्मबुद्धिस्तु देहिनां साविद्या तत्कृ
तो बंधस्तन्नाशो मोक्ष उच्यते अनादिः सान्तनैसर्गिकोध्यास इति ख्याः
प्रत्ययरूपः सर्वलोकप्रत्यक्षः अस्यात्यंतिकी निवृत्तिः प्रत्यगात्मैकत्वज्ञा
नादिति शिष्यः गुरुं परिपृच्छति भो भगवन् सर्वात्मा कीदृशः तत्स्वरूपम्
सच्चिदानंदाद्वितीयमखंडमचलमजमक्रियकूटस्थमनंतस्वप्रका तं॰
शं ब्रह्म स आत्मा ननु भगवन् नादि दीर्घोसि नित्यसंसारसंसक्तिः कथ्यतस्वे पू॰
वस्वभावोवानैमित्तिकं यदिह स्वाभाव तर्हि अवर्जनीयत्वान्न मम
मोक्षाशा नास्ति नहि वस्तु नैमित्तिकं नहि किंनिमित्तं तत्साक्षाद्धा
नमतिरस्तु स्वाश्रयस्वविषयत्वात् भवगम्या स्वमायाश्रवस्तुत्र
निर्वाच्याविद्यास्ति सा तत्स्वाश्रयत्वविषयत्वबलेन चित्सदानंदाद्विती
यत्वभावमावृणोति यथागर्भिमारांधकारिणीकृत्य गारगर्भमाच्छाद्य
६ २

मिव अहं ब्रह्मन मनुष्योऽस्मीति विदितिष्यति तत्र अनात्मनि देहादौ
आत्मत्वेनाभिमन्यमानो ग्रामाशोषाह फ्रुयार्थैपि ग्रामाशोषानर्थः
अविद्यापरिकल्पितैरेव साधनैरिष्टप्राप्तिमनिष्टनिवृत्तिं हृदि आकां
क्षन् लौकिकवैदिकैः स्वाभाविकानुष्ठितैरपि विषयस्तुरवाप्यमोऽलाकां
तामलमानमलवालो भवन् मकरादिभिरिव रागद्वेषादिभिरितस्ततः
आकृष्यमाणाः सुरनरतिर्यगादिभिन्नासु नानायोनिषु परिवर्तमानो मो
हेन मोमुह्यमानः संसरति तथा च श्रुतिः तं विदाथ य इमा जजानान्य
युष्माकमन्तरं बभूव नीहारेण प्रावृत्ता जल्प्या चासुतृप उक्थशासश्च
रन्ति स्मृतिश्च पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणान् कारणं
गुणसंगोऽस्य सदसद्योनिजन्मसु स्वामिन् युष्मद्वचनमसमंजसमिव
भाति कथं ह्ययं कूटस्थस्याविद्यानेकरूपस्यात्मनः शश्वदविद्यासदृशा
विद्यावरणविक्षेपरूपकल्पं संभाव्यते गगनारविन्दसमन्तस्यैव राम्नो। स्य
वंकृतः आलोकासंभावनीया साधु साधु अरे आत्मविवेकभ्रममा
त्रसिंच भो भगवन् स्वभ्रममात्रसिधत्वात् किं सत्यं यथा इन्द्रजाले पश्यति
जनः व्याघ्रजलडमरादि सत्यतया न प्रति भाति किं इन्द्रजालभ्रमनिवृत्तौ

सर्वं मिथ्येति इदं तु सर्वेषामनुभवसिद्धं यथा रज्वामहिभ्रमनिवृत्तेर
२ रज्जुरेव सर्प इति नान्यत्किंचिदपि तथात्माविवेकभ्रमनिवृत्तेन तदनंतरं स
र्वं मिथ्येति ज्ञायते इदं तु सर्वेषामनुभवसिद्धं भो भगवन् तर्हि अस्य भ्र
मस्य निवृत्तिः कथं तच्छृणु अकस्मात्सकथं चित्पुण्यवशाद्वा वेदो
दितेभ्यश्चरार्थं कर्मानुष्ठानेनापगतरागादिमलः अनित्यादिदर्शी
न इहामुत्रार्थफलभोगविरागः॥ वेदांतवेद्यं प्रतीयमानं ब्रह्मात्मानं बो
बुभुत्सुः आत्मानं तत्त्वमिच्छति ज्ञानादेव तु कैवल्यमिति श्रुतेः ता
न्तं श्रवणमनननिदिध्यासनमंतरेण न संभवति॥ तथा च श्रुतिः
आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्य इत्यादि तंपदा
र्थविवेकाय संन्यासः सर्वकर्मणां श्रुत्या विधीयते यस्मात्संन्यस्याप
तितो भवेत् तस्माद्वेदान्ताचार्यद्वारा प्रत्यगात्मनः ज्ञानप्राप्तिः कथमाचार्याद्ब्र
ह्मात्मज्ञानप्राप्तिः यदि प्रथमं ज्ञानतः शिष्यः तस्य ब्रह्मात्मैकत्व
ज्ञानोपदेशं कुर्यात् अथ पवित्रः तदा ब्रह्मात्मज्ञानेन ब्रह्मैव भवति
तत्र अज्ञानतत्कार्यदेहद्वयनिवृत्तिः तदा देहादिसंबंधाभावा
न्नै शिष्यादिप्रासनं ह्युपपद्यते अयाप्यवगतभावस्वात् तस्माद्देहा
दिसंबंधो नैक

तद्योऽभ्युपेतव्य इति न दुःखाभावात् रेतोऽस्याप्रदकं गर्भोत्पत्तिं पृथ्व
वर्तो वि॥ पित्तं तेजः उष्णत्वात् स्वेदो वायुः श्रमप्रसंगात् लालाकाशं उ
र्ध्वादागमत्वात् रक्तं पृथिवि लोहितत्वात् क्षुधाऽस्योऽग्निः पचतत्सा
मर्थ्यत्वात् प्रसन्नत्वात् तृषा वायुः कंठोष्ठशोषणत्वात् छिद्राका
शं अन्यस्वभावात् कान्तिरुदकं शीतलोह्लसंबंधात् रक्तलोहितं भवति
आलस्यं पृथिवी जाड्यत्वात् धावनमस्यो वायुः सबलत्वात् प्रसार
णं आकाशं व्यापकत्वात् उत्क्रमणं तेजः उत्करुव्यापरत्वात् बलनमु
दकं शिथिलत्वात् द्रुवत्वात् संकोचनं पृथिवि जाड्यत्वात् ४ शिरसिम
वकाशमस्य आकाश घना हतशब्दस्थानत्वात् कंठ्यामवकाशं वायुः
मुखनासिकयोरिति तथाप्युत्थाव धारितस्य तत्त्वं ब्रह्मेति महावाक्यार्थ
स्य तात्पर्यं गुरुः कृपया प्रतिबोधयति चित्सदानंदरूपत्वेन तदा संभावयति
भो भगवन् साक्षोर्थं नयुक्तिं कथ्य अरे शिष्य इदं शरीरं इष्टं जनमति
त्यम मंगलं त्वं न भवसि भो भगवन् इष्टं जन्मनित्यम मंगलं कथ्य इत्यं॥
तच्छरीरे उत्पत्ते आगे तत्छरीरं तव नास्ति यत इदं शरीरं त्वं न भवसि एत
च्छरीरनाशनं हृदं एतच्छरीरं त्वं न भवसि आपादं तेन यत इदं शरीरं त

इदं

वनास्ति" अतः शरीरं त्वं न भवसि अतो वर्त्तमानोऽपि इदं दृश्यं शरीरं
२ त्वं न भवसि किं च मम इदम् इति शरीरं प्रतीयते अतस्त्वं तस्मकाशादि
३ नेत्वं द्रष्टा इदं न वद् दृश्यं शरीरं त्वं न भवसि यथा आदश्मकाशयकाव्य

ॐ श्री गणेशाय नमः रे रे वानरको भुवा
हमरे त्वं पुन हंता रे दुतो हं खरखडुनया
जगतांको दं उद्धितास्य हेतम घोरं डकयोटपा
टश्रीविघोकोवा त्रिकुटाचला कोमे रुष्क
वरावरा स्वगगरा कोट स्वाकि टायत्त

((श्रीमत

श्रीमत

श्रीमत

श्रीमतस

श्रीगजाननप्रसन्न

रामसीता

सीताराम श्रीराम जयरामसी

ताराम))

को
व्यतिरिक्तो दाहकः प्रकाशको ऽग्निः तथा देहद्वयात् देहात् इयात्वं व्य
व्यतिरिक्त इति सिद्धं अपि च स्वप्नान्ते दिव्यशरीरं प्रेत्यास्वाद्य तत्तु वि
तान् भोगान् भुञ्जानः एवं प्रतिबुद्धो मनुष्यशरीरम् आत्मानं पश्यन्नहं
देवो मनुष्य एवेति देवशरीरे वाध्यमाने ऽपि किमहमास्पदं तवाध्यमानं
अतत्वं त्वं शरीरात् भिन्न एव स्वप्नमरणादौ दृश्यतात अपि च कौमारे योहं
नानाक्रीडामनुभवन् सोऽहं स्थाविरे राममूर्तिस्विन एवं वदसि तदास्मा
विरक्तमरशरीरद्वयं तस्य व्यवहारस्य त्वं द्रष्टा इदं तव दृश्यं शरीरं त्वं न भ
वसि द्रष्टृदृश्ययोर्भेदस्य सर्वत्र प्रसिद्धत्वात् लोके दृश्यन्ते घटादिवत् य
था घटादयो रूपादिमन्तश्चक्षुरादिभिः करणैः रुपलभ्यन्ते यथा इदं
शरीरं तव दृश्यं त्वं द्रष्टा इति सिद्धं अपि च जडत्वं प्रदर्शयति एवं
मत एतानि पञ्चमहाभूतानि त्वमेव जानासि तानि स्वात्मा अज्ञानं तानि पर
पिण्डानि अतएव जडानि तानि त्वं न भवसि तदंशोद्भवमिदं शरीरं
मपि त्वं न भवसि स्वामिन् तदंशोद्भवमिदं शरीरं कथं इत्थं यत्कोठिनांश
वि साप्र [illegible] यद्द्रवं तदापः यदुष्णं तत्तेजः यत्सञ्चरति स वायुः यत्सुषिरं तदा
काशमिति यतस्त्वं सर्वाणि भूतानि अस्मिन् शरीरे द्रष्टयन्ति तानि स्वरूपाणि
ति= ते

अस्थिमांसमज्जनीति पंचविंशतिगुणानि पंचमहाभूतानि तेषां समूहएव
४ देहं शरीरं जडं त्वंतमवासि भोभगवन् स्थूलशरीरे पंचमहाभूतानि पंचीकृता
नि भूयन्ते दृश्यन्ते तानि कानि पंचविंशतिगुणानि उच्यन्ते अस्थिमांसस्नायुत्व
ग्रोमाणि एवं पृथिवी पंचधा भवति रेतःपित्तं स्वेदो लाला रक्तम् एवम् आपः पंचधाभ
वति क्षुधा तृषा निद्रा कान्ति आलस्यं एवं तेजः पंचधा भवति धावनवल्गनप्रसारणोत्क्रम
णचलनसंकोचनमेवं वायुः पंचधा भवति शिरःकंठहृदयोदरकट्येकाशः पंचधा
भवति भयं पृथिवी मोहं मुदकं क्रोधोऽग्निः कामो वायुः लोभश्चाकाशमिति
भूतान्तरे भोभगवन् एकैकं भूतं पंचधा कीमिति विवेचन् उच्यते परस्परानुप्रवेशात्प
ञ्चीकरणं द्विधाविधायैकैकं चतुर्धा प्रथममेकभूतः स्वस्वेतरद्वितीयांशे योजि
नात्पंचपंचेति भोभगवन् कस्य भूतस्य को वा अंशः कस्मिंस्तत्र प्रविष्टः
कास्थितिः उच्यते अस्थि मस्याः पृथिवी किञ्चार बलात् काठिण्यं पीनवर्णा
च मासमुदकं स्यद्रवत्वात् स्नायुस्तेजः ज्वरप्रत्यपरितापात्वात् त्वग्वायुस्पर्श
धर्मत्वात् रोमाण्याकाशोच्छेदनात् तत्सतानादज्ञातं तत्कार्यनिवृत्तिः तस्मादात्माऽपि
तज्ज्ञातमेतैः तनः इति भोभगवन् द्वैतंसति शिष्यशासनं संभवति ब्रह्मज्ञानेज्ञाते स
ति येनाभावस्तदा शिष्यशासनं कस्य स्यात् अत्रन्यायं दोषोऽज्ञानिनः॥ ब्रह्मात्मज्ञाने

जातेनैवबाधितस्यापि प्रारब्धफलत्वस्य कर्मणोबाधितं॥ अतएवज्ञानिनस्तु
प्रारब्धवेगप्राग्देहादिप्रतिभासते अपावर्गेतिब्रह्मज्ञानसंप्रदायक्रमेणाउ
पदिश्यते तस्मादाचार्याधीनं ज्ञानं ज्ञानान्मोक्ष इति सिद्धं तस्माद्देहोक्तशमद
मादिसाधनसंपन्नो ब्रह्मविदमाचार्यमुपेत्य साष्टांगप्रणिपातपूर्वकं समित्पा
णिः प्रतीपवेशयविज्ञापयति यथा च श्रुतिः समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं गु
रुं तत्वज्ञानार्थमभिगच्छेत् भोभगवन् संसारतापत्रयार्कसंतप्तोहमस्य तापत्र
य निवृत्तिं कुरु मे इति विज्ञापितः सन् गुरुरुपदिशति कथं इत्थं तव ब्रह्मात्मै
कत्वभावज्ञानेन जातेन संसारनिवृत्तिर्भविष्यति तान्यथा भोभगवन् कथं तद्भ
वति न घुरादि ब्रह्मादौ त्वपदशोधितेन जीवत्वं निरस्यासि शुद्धो भविष्यसि ब्रह्मा
त्मैकत्वं भवति यथा ग्रामादिस्थितो देवदत्तः अत्रस्याप्यसंभावनाभवत्ये
वेति स्वप्नमिति अन्यत्तदसिता युक्त्या प्रतिबोधयति कटकुसगाधि घटिकां वदत
मिति अवकाशस्याग्निः सदाउष्णा स्थितिः उदरस्थ अवकाशजलं जलाशयत्वात् कटि
अवकाशपृथ्वी गंधस्थानत्वात् ५ एवं संहतात्मकजडत्वं न भवसि भो भगवन् सु
खदुःखे जानातु कथं शरीरं जडं एतदुपरि देहो न जानाति सुखदुःखे यतो भौतिको
हि जडश्च भूतानि कदापि न जानाति देशान्यपि जानाति किंतु दशसंघातो देह अपंची

तः

नीयात् आपिच देहः सन्नपि डयितवान् जानाति सबुद्धौ चौरोऽस्य हे प्रविश्यापि
५: हृत्याभरणानि गतइति तन्न जानाति किन्तुनोत्पन्न जडः घटोयथ्याहृष्यो जडश्चेति
तथ्या देहइति ननु घटो जानन्तस्यैव वर्तिष्यति देहे तत्व वर्द्धितेऽमृतो घटवद् व्यक्तं तथा देहो
क्ते इति दृष्टोपकरूपदिशति रुद्धिमानिति देहः किंचैतन्यं भवति बुद्धित्वमा
पि चैतन्यतास्ति एवंत्वया कृतन्ककेनोक्तं अतः दृष्टांतान्परिहरति यथ्यात्तृणानामो
पचयपत्रनिदलिप्यंतेसरागिः किंचैतन्यं भवति एवंप्रति दिनं किंच घटियंत्रेया कु
काकिंचैतन्यं भवति किंच कूपेऽनीयमानानां दिवद्धमानानीरे किंचैतन्यं भवति
ति वेदिकायां किंचैतन्यं भवति एवंप्रतिदिनं अन्नरूपेण सवर्द्धमाना देहरूपो नो
त्रन्संचयं सम्यक् वर्द्धमानोपिनित्यं नजड एव अतस्त्वं जडो न भवति त्वंतु चैत
मेव अनित्यत्वं प्रदर्शयति आकाशमवकाशं भवत्विति पवनो धावन
मेवयतते अग्निर्ज्वलितमेव वर्तते उदकं द्रवितुं निम्नगामि भवति पृथ्वी विशीर्णा
भवितुमिच्छति एवं सर्वाणि भूतानि स्व स्व मार्गमभिगंतुमिच्छंति अतः शरीर
रस्यानित्यत्वं विविच्य मंगलत्वं प्रदर्शयति जन्मकार्ये परास्थशयना
तो देहो मलादत्यंताशुद्ध एव रक्तरेतसोः संयोगो मलभाजनो निष्पन्नो देहः मा
लाद्त्यंताशुद्ध एव अतः दशदोषदुष्टो देहः त्वं न भवसीति सिद्धं भोभगवन्
"किंच कुंभस्यादि निर्माणान्मुहुर्मुहुर्निर्दिष्यमाणानां मृद्वि वर्द्धमानानां वेदिकायां
किंचैतन्यं भवति" ५५:

केनेदोषा दश तेषुरात्र अस्पृश्यं १ अशौचं २ दुर्गंधिं ३ अस्थिरं ४ मलखंडं ५
दग्धं ६ शिथिलं ७ नानारोगग्रस्तं ८ अध्रुवं ९ अमितं १० अतो हेतोः स्थूलश
रीरं त्वं न भवसि एतत्श्रुत्वा भो भगवन् इदं स्थूलशरीरमहं न भवामि एतावता
मम किं ज्ञानं स्थितं साधु साधु अरे सावधानमनाः श्रृणु यदा इदं शरीरं त्वं न भवसि
तदा अनित्यजातिवर्णाश्रमश्च त्वं न भवसि षड्भावविकारस्तव नास्ति जायतेऽस्ति
वर्द्धते विपरिणमते अपक्षीयते विनश्यतीति वर्णधर्माश्रमाचारः शास्त्रयंत्रेण
योजितः निर्गतोऽसि जगज्जालात् पंजरादिव केसरीति वर्णाश्रमधर्मोऽपि न
वत्सस्यैव यतः शास्त्रमाह वर्णाश्रमाभिमानेन श्रुतेर्दासो भवेन्नरः वर्णा
श्रमविहीनश्च वर्तते श्रुतिमूर्धनि यावद्देहात्मविज्ञानं बाध्यते न प्रमाणतः
प्रामाण्यं कर्मशास्त्राणां तावद्देहेषूपपद्यते इति अहं देहो भवामि इति यदा
ज्ञातं जातं तदा सर्वकर्तृत्वमपि तव नास्ति भो भगवन् इदं स्थूलशरीरमहं न
भवामि त्वदाज्ञया ज्ञातं स्थूलशरीरसंबंधाभावात् वर्णाश्रमकुलदेवतागोत्र
जातिस्त्रीपुरुषनपुंसकस्थूलह्रस्वदीर्घश्यामगौरादिनामरूपषड्भावविकारधर्मा
धर्मादि ममता नास्त्येव नवच्छपाकटात्तान्निरीक्षरागात्मन्यगमयाज्ञातान अन्यच्च
भो भगवन् इन्द्रियाणामभावे शरीरचलताभावात् काणोऽहं बाधिरोऽहमित्या

यत्तुभवांश्च इंद्रियाणामहमितिपृष्ठे गुरुराह त्वंनभवसि" कथ्यइत्थं तद्व
६ तत्कार्यमेव भोभगवन् कथयभूतस्यकिंकार्यमुच्यते नभसःसकाशाच्छ्रो
6 त्रवाचौद्विकरणौसमुत्पन्ने वायोस्सकाशात्त्वक्पाणी द्विकरणौसमुत्पन्ने ते
जसःसकाशाच्चक्षुःपादौद्विकरणौ समुत्पन्ने उदकात्सकाशाद्रसनोपस्थे
द्विकरणौसमुत्पन्ने पृथिव्याःसकाशात् घ्राणपायोद्विकरणौसमुत्पन्ने
पंचांशेनसहमनोजातं बुद्धिर्मनोविशेषः एव एतद्देवविवृणोमि वाक्श्रोत्रे
आकाशकार्यएवविचार्यप्राधान्येसति शब्दाभिव्यंजकत्वात् प्रायेणाश
ब्दोत्पत्तिर्वा त्वक्पाणीवायुविकारौ स्पर्शग्रहणसाधनत्वात् स्पर्शवद्देवा
द्रव्यस्यहस्तेनोपादानशक्यत्वात् चक्षुःपादौतेजोविकारौ रूपस्यग्राहक
त्वात् प्रायेणालंघनादयोः उपस्थजिह्वेउदकविकारौ एकरसग्राहकत्वा
त्स्निग्धत्वात् यतोपस्थे आनंदत्वात्" घ्राणपायू पार्थिवौ गंधग्राहकत्वात् गं
धस्थानत्वात् बुद्धिर्मनोविशेषः काचकवाटकवत् पंचप्राणाव्हृतिर्वायुवि
कारएव" तदात्मकत्वेनोपलभ्यमानत्वात् एवंभूतानिजडानि तद्दर्शनसंयो
गादिइंद्रियाणिजडानि भोभगवन् स्वस्वविषयंजानंतिकथ्यं इंद्रियाणांज
डानि तं दृष्टांतः श्रोत्रमात्मानंनजानाति" परमपितज्जानन्ति स्वस्वविषयंप्र

दंतान्नेत्रोष्ठं कान्यविषयमर्पितानं नसमर्थ्यं उभयथ्याजड किंतुशब्दज्ञानर
करणोसाधनानित्यर्थः प्रदीपवत् यथादीपोरूपादिज्ञानसाधन यथादी
नेः पेनरूपादिगृह्यते तथाश्रोत्रेण शब्दंश्रिणोति एवमिंतराणायपिकरणाभि
कर्मेंद्रियाणि क्रियासाधनान्येवं पथ्यादर्विवनक्षात्यंतजडानि त्वंनभवसी
तिसिद्धं त्वंतत्ज्ञानमेव भोभगवन् प्राणोसतिदेहश्चेष्टतेइंद्रियाणायपिचेष्टं
तेप्राणोगतेसतिदेहश्चेष्टाहीनोभवति इंद्रियाणयपितथाहप्राणेनिर्भवंतिअ
हंक्षुधावान् पिपासावान् इत्यादीन्भवाक्त अतःप्राणएवाहं त्वंनभवसि
कथं इत्थं चैतन्याभावात् सुषुप्तौस्वप्नेवा उछ्वासनिश्वासरूपेणाप्रवर्त्तमानो
व्ययमंतर्वहिर्नजानाति चौरोगृहेप्रविश्यापहृत्यभूषणानिगच्छतिसत्त
दानजानातिअतोन्यंतजडाएवप्राणादयःदेहवदेव अपिच एकस्मिन्नप
र्यंकेशयनेसतिद्वयंस्वपरूपेस्थितेसतिकस्मिश्चिज्जारः आगत्यात्द्वियासहरूप
राणिपरिहृत्यगच्छतिसति इत्यनकर्त्तव्यमितिप्राणोनातिवारयतिअतोत्यंत
जडाःप्रबुद्धोजानातिइतिचैन्न सर्वावस्थासु उछ्वासनिश्वासरूपेणास्योपरतिर्ना
स्त्येव स्थितापप्सोनजानाति कथंइत्थं इदानीकास्मिनभागेश्वासोवर्त्तते इतिपृ
ष्टोपिअस्मिन्भागेअस्त्विवर्त्तते इतिप्रतिवक्तुंनजानाति अतःस्थित्वापिनजानाति।

७ तस्यायमर्थः ननुजडस्त्रैतन्यात्मा प्राणः कथं जडं शरीरं चेष्टयति उच्यते जडोपि जडं चे
ष्टयन् लोके दृश्यते अन्तःप्रचण्डमारुतः गृहाद्यादिनपर्यायांख्यावृत्तं भ्रमत्यन्त्रपा
मे= चयति जडस्याप्ययन्निस्वभावः नैनावतात्माभवति प्राणाश्चयस्त्वचेष्टुगत स्वतं
त्राकर्माधीनैव कथं स्वप्नं जाग्रत्स्थित्यात्तिर्निमित्तं कर्मोद्भूतं भवतीतिदपेत यस्य
प्राणिकर्मगतिकरणात् तिरोहीत्वा बुद्ध्युपाधिसम्पृक्तं निजविज्ञानेन स्वस्व
प्रुस्थसिवागच्छेत एवं स्यात न प्रयेतवरतं गच्छति कर्मनिमित्तं चेत्प्राणमनागम
नं प्राणोपि तत्कर्मवशादेव शरीरपरिपालयत्वजते अन्यथा प्राणपिव्यापारस्यानां
दिव्यापारचेष्टाकर्तृत्वं समर्थः अन्तःजडाएव प्राणादयः एवं सम्महात्मकं सम
दृष्टौ लैंगशरीरं त्वतत्त्वं वसितीति सिद्धं मअत्त ओभगवन् मनसि स्वैस्वस्थे सति
पश्यतीर्त्ति स्वरूपेति स्वं सकल्पवात् विकल्पवात् इत्याघनुभवाद्व मतोव्यग्रे मं न:
पश्यतीत्यध्वरणोति अतोमनएवाहं त्वं नभवामि स्थानी भिन्नतोन्यत्र दृश्या
रीति स्थिरीभूत पश्यति उभयवतीयोवेत्ति सम्मतो न भवति मनसः सका
शात्त्वं दृष्टाभिन्न एव अपि च यन्मनः साबुद्धिरिति उच्यमाने प्रतिज्ञाहानि किंतु गं=
द्वराभ्रयुगपत्प्रभावातियतयोरेकप्रधनाभेद्यान्योत्पत्तिः मनःउत्पत्तिमाधितां
शवान् स्मृत्यावत्त्वावादितितैर्वैवानुभवः अत्राप्यन्तिरापि आत्मनो मनोजानंत

त्रैव विलीयन्ते इति अतः अतस्त्वं न भवसीति सिद्धं एवमिन्द्रियसमूहात्मकं सप्तदश
कं लिंगशरीरं त्वं न भवसीति सिद्धं भो भगवन् एवं चेदहं लिंगशरीरमहं न भवामि
अनेन ज्ञानेन मम को लाभो भविष्यति अरे सावधानमति शृणु यदा लिंगशरीरं
त्वं न भवसि तदागमनागमने स्वर्गनरकादिभोगोऽपि न भवता एवं अपि च प्रारब्ध
कर्मफलभोगोऽपि न भवतास्त्येव भो भगवन् न कथं इत्थं देहो भोगायतनं वि-
षया भोग्याः इन्द्रियाणि भोगसाधनानि मनो बुद्धिर्भोक्तारः एवं भोक्ता भोगायतन
भोग्य भोगसाधनानि एतच्चतुष्टयं त्वं न भवसि तस्मादारब्धकर्मफलभोगस्त्वं न भवत्ये
व भो भगवन् जाग्रत्स्वप्नयोः सुखदुःखमहमनुभवन् कथं सुखदुःखं मम नास्ति इति
अनुभवः न शृणु अरे शरीरगतावृत्तः क्षुलोदरवेदनादयः सुषुप्त्यावस्थामापन्न
स्य बुद्धिरहितस्य न वत प्रतीयन्ते अतस्ते न बुद्धिधर्मा भवन्ति द्वैतस्यैव त्वयि मन्य न:
ते मूढो यथा जलस्य चंद्र यतः शास्त्रमाह न ह वा सशरीरस्य प्रियाप्रिययोरपहतिः
अशरीरं वा वसन्तं न प्रियाप्रिये स्पृशत इति श्रुतिः शाखा कामः संकल्पो
विचिकित्सा श्रद्धाश्रद्धा धृतिरधृति र्ह्रीर्धीर्भीरित्येतत्सर्वं मन एवं भगवन्
इच्छाद्वेषसुखदुःखं संघातश्चेतना धृतिः एतत्क्षेत्रं समासेन सविकारमुदाहृतं
स्मृतिरपि रागोद्वेषा सुखदुःखादिबुद्धौ सत्यां प्रवर्तन्ते सुषुप्तौ नास्ति तन्नाशे तस्मा-
द्बुद्धे

स्वतात्मनाः अंतःकरणधर्म इन्द्रियधर्मः क्षुत्पिपासादिस्त्वं भवान्न लिंगशरीरम
हंनभवामीतियदाज्ञानंजानंनदानातायोनिम्नमरामंशः नवगुणगणरहितोभ
8 वसि स्वामिन् तेनवगुणाः के बुद्धिरागप्रयत्नद्वेषसंस्कारधर्माधर्मसुखदुःखा
नीति भोभगवन् अंतःकरणोवाह्येकरणोप्यापिप्राणसंघातोदेहोहंनभवा
स्यानु"ति इंद्रियाणांहंनभवामि एतत्सर्वसंघातमहंजानामि मामहंनजानामी
तिभ्रमाश्रितंअंतःकोहंदेहीति:संदेहभ्रांतितिरासंकरणममेतिविज्ञापितः
सन गुरुरूपदिशति तत्कोयं इयं इदंसर्वदृश्यंपृथक्पृथक्रूपंत्वंजानासि
वा
आत्मानमेवनजानासि इति वदासि एतद्देवतावाक्यंनइदमेवकारणशरीरं ॥
अस्याश्रयस्त्वमेव किंनजानासि इतितत्कारणशरीरमव्याकृतमसा
नसंज्ञिकमास्ति त्वमेव कथयस्व त्वदन्यःकोपिनजानातीतिइतिकुमेववदसि
मामहंनजानामीति अस्यज्ञानस्यत्वमेवाश्रयः अज्ञानस्यैवमेवंत्वंसम्यक्
वात्सि अतस्त्वंजडोनभवासि वेद्यकेद्रत्वात् अतस्त्वंज्ञातंतस्याज्ञानस्या
श्रयाः किंज्ञानंतद्ज्ञानाज्ञानमापित्वमेव त्वयिस्थितमज्ञानंयत्तोजाना
सि अतस्तस्यपृथक्साक्षी नवदृश्यमानोत्वंनभवासि स्थूलसूक्ष्मशरीर
वत् अतःकारणशरीराद्भिन्नस्त्वं एवमाश्रयाविलक्षणज्ञानमात्रसाक्षी

स्वरूपत्वेऽप्येवंसतिमांकोऽहमितिनवेदसि ततः निःसंशयं स्मरतः इंद्रियाणि त्वा
मानंस्वकार्यंनजानन्तिपरस्परमपिनजानन्ति अतः जडानि त्वत्त इंद्रिया
णिइंद्रियवृत्तिं च सदाजानासि मनः स्वात्मानंनजानाति परस्परं बुध्यादि
व्यापारंकर्तुंनसमर्थं अतः अहं त्वं च मनोबुध्यादीनि सदाजानासि अत
स्तवस्वरूपंज्ञानमेव यथा राहोः शिरः शिर एव राहुः तथा ज्ञानमेव त्वं
तथा च श्रुतिः ॥ येनवापश्यति येनवाशृणोति येनवागंधानाजिघ्रति
येनवावाचंव्याकरोति येनवास्वादुचविजानाति तद्विज्ञानंब्रह्मणो
वेत्तिविश्वंनचतस्यास्तिवेत्ता नमाकुन्यरूपधराणां यस्यभासासर्व
मिदंविभाति स्मृतिरपि इंद्रियाणिपराण्याहुरिंद्रियेभ्यः परंमनः
मनसस्तुपराबुद्धिर्योबुद्धेः परतस्तुसः ज्ञानमात्रस्त्वमितिभावः अथ
विधिमुखेनप्रबोधयति यतो ज्ञानंनित्यमात्रस्वरूपस्त्वं अतस्तवाज्ञानं
नास्ति यथासूर्येतमः अतस्तस्याज्ञानस्याभिव्यंजकंज्ञानमपितव
नास्ति ज्ञानस्वरूपत्वात् यथादीपस्यान्यदीपेनानास्त्येवप्रकाशस्वरू
पत्वात् तस्मादज्ञानज्ञानोद्भवौबंधमोक्षावपितवनस्तः अतोनित्यमु
क्तरूपत्वं यतः शास्त्रमाह अनात्मात्मानमधीर्विधत्ते नौ शोमोक्षाउत्पन्ने
बंधमोक्षौनाविधत्तेनित्यमुक्तमेस्यचात्मनः अतस्त्वंविरूपः सद्रूपत्वंवद।
क्त
वि:

र्शयति चक्षुरादीनि करणान्यादित्याद्यनुगृहीतानि स्वस्वविषयेषु प्रवर्त्तन्ते त
९ त्र बुद्धिः करणव्यापारमनुभवति सैव चैतन्योज्ज्वलितोऽभयात्मको दृष्टादृष्टयाकार
विपरिणामसे तज्जागरणं भवति तस्य साक्षीत्वं चैतन्यं जाग्रत्संस्काररूपवाप
वासनावासितबुद्धिः पुष्पपुटिकावत् सैव चैतन्योज्ज्वलितोऽभयात्मको दृष्टादृष्टया
काराविपरिणामसे तत्स्वप्नं भवति यथाविज्ञपटः तस्य एष्य एकभूतः साक्षीत्वमे
व जाग्रत्स्वप्नावस्थासर्वसंस्कारैः सह बुद्धिः सा मूलविद्यायां लीना सा
विद्यासंस्कारमात्रावशिष्टत्वात् यदि अग्रस्य निर्विकल्पानुभवो भवतीति सूते
द्वयं सा सुषुप्त्यवस्था श्रुतिश्च न कंचन कामं कामयते न कंचन स्वप्नं पश्यति
सुस्वरूपमेतिनियोवेति तस्य तत्साक्षीस्वरूपः एवं त्र्यवस्थात्रयभावाभाव
स्य: साक्ष्यनुस्यूतं एष्य एकभूतं चैतन्यं तत् अतः कालत्रयावस्थात्वीसर्वदाभावस्व
रूपमित्यर्थं अन्यस्य सत्तामसत्तां स्वयं जानासि स्वसत्तां स्वत एव प्रमाणं स्व
सत्तानानां अप्ययं विनानसंभवति अतः स्वसत्तामनुभवासिद्ध अतस्तत्त्वस्वरू
पं सद्रूपं २ अथानन्दरूपतां प्रदर्शयति व्यावृत्तेषु इंद्रियेषु स्वविषयात् ह्लयं
तस्मिन्नेव सुषुप्त्यावस्थायां स्वरूपे विश्रम्य तानि पुनः स्वस्वरूपे उ
त्थितानि कोर्योः स्वव्यापारे समर्थानि भवन्ति हि अर्थः यथापुटस्थगतघृत
अतस्तत्त्वस्वरूपमानंदत्वं ज्ञापितीयत्तं प्रदर्शयति अब्रह्मादिपिपीलिकां

श्रुति

तमनुस्मृतंमंतर्यामिसाक्षीएकः अतस्तत्वस्वरूपमद्वितीयं तथाचश्रुतिः

एकोदेवःसर्वभूतेषुगूढःसर्वव्यापीसर्वभूतांतरात्मा कर्माध्यक्षःसर्वभू

ताधिवासःसाक्षीचेताकेवलोनिर्गुणश्चेति ननुसाक्षीसप्रपंचःसाद्वितीय

एकःकिंनभवति तथुरण्ड मृत्तिकाकारेषुमृदिव स्ववर्णविकारेषुस्वर्णमि

व तंतुकार्येषुतंतुरिव विश्वकर्त्ताप्येकएव रज्जौसर्पवत् भ्रांतिकारणत्वात्

अतस्तत्त्वमद्वितीयः ४ अखंडत्वंप्रदर्शयति सजातीयविजातीयस्वगत

भेदरहितत्वात् एकरसःअखंडस्त्वंसैंधवघनवत् ५ अचलत्वंप्रदर्शयति

जन्ममृत्युरहितत्वात् त्वंअचलः ६ अनंतत्वंप्रदर्शयति अनादित्वात्कार दि

तारहितत्वात् त्वंअजः ७ अक्रियत्वंप्रदर्शयति यथाभ्रामकसत्तासान्नि

धिमात्रेणजडमयंलोहंचेष्टते तथाहंकारममकारादिप्रयत्नरहितस्य

सच्चिदानंदस्वरूपस्यतवसत्तासंनिधिमात्रेणदेहेंद्रियप्राणमनोबुद्धिःस

कारान्सदसत्क्रियाउत्पद्यंते अतस्तत्वस्वरूपमक्रियं तथाच आत्म

चैतन्यमाश्रित्यदेहेंद्रियमनोधियः स्वकीयार्थेषुवर्तंते सूर्यालोकेजनाइव

अत्रभगवानाह शरीरवाङ्मनोभिर्यत्कर्म प्रारभतेनरः न्याय्यंवाविपरीतं

वापंचैतेतस्यहेतवः सच्चिदानंदाद्वयस्वरूपंतवस्वभावः यथाधु

हुवत् सवितुःप्रकाशवत् ८ अप्यकूटस्थस्वरूपंदर्शयति कूटस्थसवि

श्री

कारि कृतवतिष्टन्तीत्यनिकृतस्थः अतस्त्वं कूटस्थः ९ अनंततां दर्शयति आ
९ काशादिपृथिवीपर्यन्तं सर्वमन्वेकुपूर्वव्यापकं चैतन्यं यथा घटस्तेऽर्वा
व्यापकत्वम्ः अतस्त्वमनंतः १० स्वप्रकाशत्वं प्रदर्शयति नवदश्यमात्मनि
10 दं सर्वं त्वमवभासयसि त्वं तेनैवानुभवः सच्चिदानंदस्वरूपस्त्वमवभासितनैवा
त्मानं कथं अतस्त्वं स्वयंज्योतिस्वरूपः ११ ब्रह्मत्वं प्रदर्शयति ब्रहत्वात्
ब्रह्मणत्वाद्वा ब्रह्मेत्यात्मेति विवेच्यते नत्वं ब्रह्मपरंरूपं गीयते वेदवाक्य
तिः अतस्त्वं ब्रह्म १२ अतः चित्सदानंदाद्वितीयमखंडमचलमजममक्रि
यं कूटस्थमनंतं स्वप्रकाशं ब्रह्म एतैर्यद्गिराविशेषणो विशेषितं पर ब्रह्म तत्त्वमेवाह
मिति प्रतिपद्यते यथा नीलमहत्सुगंधुत्पलवदात्मा एवं तितस्य कूटस्थो
कामलुपवत्त्र न स्वतीत्येवानुभवो नान्यः अत्र श्रुतिः तव नेयं प्रज्ञानघन
नाम धेनुयान्तिभवति ॥ आत्मा वा इदमेक एवाग्र आसीत् तस्माद्वा एतस्मा
दात्मन आकाशः संभूतः तत्सृष्ट्वा तदेवानुप्राविशत् अतः प्रविष्टः
शास्ता जनानां अंतरमभवाद्यं स्वबाह्याभ्यन्तरो ह्यजः शरीरं शरीरेषु स
त्वात्स्वं सर्वेषां स्वाप्य हानिः अत्रायं पुरुषः स्वयंज्योतिर्भवति योयं विज्ञा
नमयः पुरुषः योयमसंमोहयं पुरुषः योयमविनाशी पुरुषः
प्रत्यगानंदमयः पुरुषः सहस्रशीर्षा पुरुषः योयमन्नमयः पुरुषः ॥

विज्ञानमानंदंब्रह्म प्रज्ञाप्रतिष्ठाप्रज्ञानब्रह्म सत्यंज्ञानमनंतंब्रह्म एक
मेवाद्वितीयंब्रह्म अयमात्माब्रह्म स्मृतयश्च क्षेत्रज्ञंचापिमांविद्धि नव
द्वारेपुरेदेहि अनादित्वान्निर्गुणत्वात् समंसर्वेषुभूतेषु उत्तमःपुरु
षस्त्वन्यः॥ नजायतेम्रियतेवाकदाचित् नादत्तेकस्यचित्पाप आवि
भक्तंविभक्तेषु विद्याविनयसंपन्ने वासुदेवःसर्वमिति उपद्रष्टानु
मन्ताच सर्वेंद्रियगुणाभासं आत्मैवदेवताःसर्वाः एतैरन्यैश्चातिश्रो
त्रोर्विशेषितंपरंब्रह्म तत्त्वमसीतिस्वानुभवः ब्रह्माहमस्मीतिश्रुति
गृहीत्वोश्चीगुरोरात्मा एवं वेदवाक्यतःगुरुतःस्वतःत्रिःप्रकारेण ब्रह्माह अहमस्मीति
ज्ञात्वासमन्वक्रमति तथाचश्रुतिः वेदाहमेतंपुरुषंमहान्तं आदित्यव
र्णंतमसःपरस्तात् तमेवंविद्वानमृतइहभवति नान्यःपन्थाविद्य
तेयनाय अहमेतंपुरुषंपुरुषोत्तमं वेद ज्ञानामि॥ महान्तंव्यापकंआदित्य
वर्णंज्योतिर्मयं तमसःप्रकृतेःपरस्तात् एतत् तत्स्वरूपं पुरुषमेवं
विदित्वा मृत्युमतिक्रम्य एतिगच्छति अपुनरावृत्तये अयनायगमनाय
आन्यःपन्थानविद्यते अयनाय इतिप्राप्तेनलोपःछांदसः स्मृतिरपि
तत्राह अन्यथाशास्त्रगतिधुलुठताभवन्तामिह भवताकृतमज्ञानंनक
लेविनिवर्तते यावदज्ञानभावश्यानतावद्धेजानिभवतो भेदभावाद्रूपं

वेति स्वास्मिन्नेव कृतालयं शान्तभक्तिज्ञानवैराग्यं एतदेव तत्संशयः ज्ञा
११ नैकं सत्त्वं प्रेमविवेकेनैवमात्मनः तस्मात्साधनान्तरं नास्ति अत्र
भगवद्वचनं य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह सर्वथा वर्तमानोऽपि
न स भूयोऽभिजायते बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते वासुदे
वः सर्वमिति स महात्मा सुदुर्लभः तस्मात्सर्वमेतद्वासुदेवाख्यमव्य
यं ज्ञातव्यं एतत्त्रयं नित्यमेवं स्वात्मस्थितं नातः परं वेदितव्यं हि किंचित् एक
मेवात्मा परंब्रह्म संसारधर्मविमुक्तस्त्वाभिन्नोऽसि एवं त्वमभयं प्राप्तोऽसि
संसारदुःखान्मुक्तोऽसीति एतत्सर्वं विमृश्य यथेच्छसि तथा कुरु
अतस्त्वं वद किं करोषि भवसि यतः शास्त्रमाह आत्मानमद्वयं कश्चिज्जा
नाति जगदीश्वरं यदि तेन तत्सकलं तेन एतस्य कृतं भवेत् आत्मैवं यैं
ग जन्मसर्वेत्रायं येन महात्मना यदृच्छया वर्तमानं तं निषेद्धुमुत्तकः अनंतरं
नर्जन्माभाव उक्तः तथापि प्राक्तनाशो मतेः अत्र जन्मानि कृतानां
कर्मणां जन्मान्तरकालभावितानां च यानि चातिक्रान्तानि अनेकजन्मकृता
नि तेषां च फलदत्वान्नाशो न युक्तः तस्मात्त्रिप्रकाराण्यपि त्रीणि जन्मान्यारभ्
म संहातानि सर्वाणि तावत् अनेकजन्मेति अन्यथा कृतानि प्रतापेऽसर्वज्ञानत्वप्रसंगः
एतत् एकं स्यादिति अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभमिति तज्जन्मतांजा

यत इत्युक्तं तत्र ज्ञानाग्न्युपस्पृष्टानि सर्वकर्मबीजानि दग्धत्वेनांकुरयंति तथा च स्मृ
तिः बीजान्यग्न्युपदग्धानि न रोहंति यथा पुनः ज्ञानदग्धैस्तथा क्लेशैर्नात्मा संपद्य
ते पुनरिति अस्तु तावत् ज्ञानोत्पत्त्युत्तरकालकृतानां कर्मणां दाहो ज्ञानेन सहभा
वित्वात् नापि इह जन्मनि ज्ञानोत्पत्तेः प्राक्कृतानामपि ज्ञानानामनेककृतानां
दाहो युक्तः तत्र तस्य तावदेव चिरं यावन्न विमोक्ष्ये इति श्रुतिरिषीकातूलवत्क
र्मेति सर्वाणि कर्माणि भस्मसात्कुरुते तथा भो भगवन् सर्वाणि भस्मसात्कु
रुते तथा इति विशेषणात् तथा वर्तमानजन्मारंभकाणि न क्षीयंते फलदाना
य प्रवृत्तान्येव सत्यपि ज्ञाने तथा प्रारब्धफलानामपि कर्मणां क्षयो न युक्तः इति न
दसत् यथा तेषां मुक्तेषु वत् प्रवृत्तफलत्वात् यथा शरं लक्ष्यवेधाय इषुर्धन्विनो
लक्ष्यवेधोत्तरकालं तथा प्रारब्धवेगक्षयात् पतनेनैव निवर्तते एवं शरीरारंभक
कर्म शरीरस्थितिप्रयोजनेन निवृत्तेऽपि संस्कारवेगक्षयात् पूर्ववत् प्रवर्तते एवं किं
चिल्लाय देहे यावत् मात्रार्पयं इष्टानिष्टापरेच्छाप्राप्तिज्ञानेन क्षीणोपि ज्ञानी सुखदुः
खमन्तरागान्यारब्धफलान्यनुभवन् अन्तःकरणाभासादीनामवभासकः सन्
तिष्ठत्येव प्रारब्धकर्मक्षयात् जीवन्मुक्तानां पुनर्जन्माभावः उक्तः स्वरूपे परे
मात्मन्यवस्थितिः कर्मक्षयं तत्पश्यन्ति चापरोक्षात् प्रारब्धनाशात्प्रतिभासनाश एवं क्र
मान्नश्यन्ति चान्यकर्म कर्मणां मायामूलत्वात् मायानाशे सर्वकर्मभस्मा
भवेत् तत्रस्थितं

याकृत्तानां कर्मणां शरीरान्तरे तेनापि भोगो भवत्विति चेन्न तस्य कर्मफलोपन
१२ यकर्तृत्वाभिमानो नास्त्येव अ संगो न हि सज्जते यतादि द्वन्द्वयो अन्यत्र
रोपणं तदोत्र धर्मः स्वहस्त्यं च गुप्तोस्त्यस्याः प्रकृत्तानि वानापि धावन्ति फलेलाप मे
तिवेतिश्रुतेः गुणो गुणे षु वर्तत इत्यनुसंधानेन शरीरयात्रास्य स्यात् अतस्त
था शरीरयात्रास्य स्यान्निर्माल्यसिध्येत् तथा च गतसंगस्य मुक्तस्य ज्ञानावस्थि
तचेतसः यज्ञायाचरतेकर्म समग्रं प्रविलीयते जीवन्मुक्तस्य प्रारब्ध तयेशरीर
पालात्पूर्व तिहकर्मविभागं प्रपञ्च तदधिगम उत्तर पूर्वाघयोरश्लेषविनाशौ
तद्व्यपदेशात् तत्र पुत्रा दायमुपयाति सुहृदः साधुकृत्यां द्विषतः पापकृत्या त्यां
ग२ तिर्व्हन्तीतिश्रुतेः न तस्य प्राणा उत्क्रामन्ति तत्रैव समवलीयन्ते किन्तु प्रा
रब्धं निष्क्रिया ज्ञुक्तेः अन्यानि ज्ञानेन दह्यन्ते शरीरे तिष्ठति हि रकर्म णोपि विक्रिया
वादिनो अनारब्धस्या हि ज्ञानेन निर्वापः क्रियते नापि च अव्ययनिबन्धनत्त
स्य प्रारब्धस्य भोगार्थ शरीरधारणे को दोषं यथा उत्खात दंष्ट्रोरगवन्न
अविघाकार्य दृ द्वयमत्ताः किंकरिष्यति स्वामिन् कारणनाशे कार्यमस्ती
ति लोके दृश्यते यथा रज्जुस्वरूपे ज्ञाते सर्पज्ञानं निवर्तते तथापि भयजनितकं
प। पादिकं वर्तते यथा कुलिन्तसयन्त्रिवल्मीकिमष्टता ग्रत्यसताशेनेव मेवदं शरीरं यावस्मित
विदुःशरीरे पतितोऽस्थितेवा मुक्त इति श्रुतिरपि सदेव मुक्त इति ब्रह्मैव सन्ब्रह्माप्नोति

विमुक्तश्च विमुच्यते स्वभावस्त्वं नित्यमुक्त एव इदानीमिति स्वप्नद्रष्टोत्स्वप्नागतस्य
येनैव प्रबुद्धः स्वप्नं व्यवहारे सर्वस्मिन् मिथ्याभूतेति रक्तेसति सत्यस्वरूपं स्वयमेवा
वशिष्यते ननु प्रारब्धकर्मक्षयात् शरीरनाशः शरीरनाशात् पुनर्जन्माभावः सर्ववि
शेषरहितं सत्यमेव ज्ञानं तदा हि नैवाहमिदमुच्यते किंच प्रमाणाविषयत्वान्नास्ति
ब्रह्मेति प्रसज्जते असदेव तत्र प्रशान्तसत्यस्वरूपमेवावशिष्यते तत्किमर्थ्यमग्री
करणं तदसत्तु नष्टुरज्जु निर्मुच्यापित्वचं सर्पस्वस्वरूपं न मुंचति नास्यामिति
त्तौ
वयोर्हेतुरिति वक्तुं न युज्यते किंच अमायां वयप्यां वंद्रो दृश्यते नार्कयोगतः
तथात्मज्ञानयोगेन भासतेन स्फुरन्नतः किंच अमायां वयप्यां वंद्रो ह्यालिंग
त्वान्न दृश्यते दृश्यत्वयात्तथा द्रष्टुर्व्यवहारो न दृश्यते आपातत आदेशो नेतिनेति
राव:
अदीर्घमस्थूलमनरायरूपत्वमिति श्रुतेः यतो वाचो निवर्तन्ते अप्राप्य मनसा
सह यद्वाचानभ्युदितं इत्यादिनिषेधस्यासिद्धिर्नास्ति सर्वस्य निषेधस्य सावधि
सत्य कत्वात् अन्त एव स्वरूपमवशिष्यते यन्निषेधद्वारा सदुक्तं तत्सर्वं प्रपंचस्य नत्वा
त्मनः यदात्मा न सदुक्तं भवति तदा वंध्यापुत्रेणाकार्यं कर्तुं न निर्वहति अतएव दे
व प्रमाणमात्मनं सत्यमिति सद्भावे श्रुतिप्रमाणं सदेव सोम्येदमग्र आसीद्
सत्यं ज्ञानमनन्तं ब्रह्म स्मृतिरपि अविनाशि तु तद्विद्धि येन सर्वमिदं ततमित्या
दि किंच ब्रह्मसद्भावे प्रमाणापेक्षा नास्ति स्वतः प्रमाणं ब्रह्म जाग्रदाद्यवस्था

ज्ञेये प्रमाणत्वाव्यभिचारात् कूटस्थानित्यत्वासिद्धिः सुषुप्तौ व्यभिचार इति
१३ चेत्तन्न तत्रापि प्रमेयत्वं निवारयन्ति सर्वलोकाः कथं नाहमत्र सुषुप्तौ किं
13 चिदुपलब्धवानिति प्रमाणत्वं असिद्धस्य हि वस्तुनः परिच्छित्तये प्रमाणापे
क्षा न तु स्वात्मनः आत्मनश्चेत् प्रमाणापेक्षा न तत्स्वात्मता आत्मनश्चेत् प्रमाणा
पेक्षासिद्धिः कस्य प्रमातृत्वं स्यात् यस्य प्रमातृत्वं स एव बोधात्मेति निश्ची
यते अत एव स्वतः सिद्ध एवात्मा न प्रमाणापेक्षा यदिह प्रपञ्चजातं तदविद्य
याकृतत्वात् प्रतिच्छायामात्रं कूटस्थानित्यत्वासिद्धिः तादात्म्यसत्तासामान्यमनुस्यूत हि
क्तत एव नाभावो विद्यते सतः अतः सत स्थूलं कार्यं असतः सूक्ष्मं कारणं ततः स
र्वविधविकल्परूपेण ब्रह्मैव भवति तथा च विज्ञानात्सर्वं तस्यैव विश्वैर्विश्वमिदं
जगत् दृष्टव्यमनन्तमतस्तस्माद्ब्रह्म सर्वोऽपि यथा बुद्धेरिति तादृक्कल्प्यमेवं बहु
धाकारं तेषु ब्रह्म आनिर्वाच्या महती मायालक्षणा शक्तिः यथा नाना भा
वं नयति तथा च श्रुतिः इन्द्रो मायाभिः पुरुरूप ईयते तद्द्वावेतौ ब्रह्मणो
रूपमित्युक्तत्वाद्यास्त्वं द्वैतमिति नन्वात्मवत्तथा च यत्र हि द्वैतमिव भवति
तदितर इतरं पश्यति तदितर इतरं जिघ्रति इत्यादि यत्र त्वस्य सर्वमात्मैव भूत्तत्केन
कं पश्येत्तत्केन कं विजानीयात् नान्योऽतोऽस्ति द्रष्टा। नान्योऽतोऽस्ति श्रोता नान्यो
तोऽस्ति विज्ञाता यदयं सर्वमविज्ञातान्तव्यतिरेकेन विजानीयात् एतत्सर्वमवि
दि

लमात्मैव अनात्मद्भासकं नित्यशुद्धबुद्धमुक्तःस्वभावंप्रत्यक्चैतन्यमेवात्मतत्त्व
मितिवेदान्तविद्वदनुभवश्रुतिः गुरुप्रसादेनजायमानब्रह्मापरोक्षवृत्तिसा
धनेनप्रबुद्धाः सर्वास्मिन्मिथ्याभूतेऽप्रमेयस्वरूपस्वमेवावशिष्यते एवमा
यानिद्रायःप्रबुद्धोजीवन्मुक्तः प्रारब्धकर्मजनितफलाबाधितोलोकाननुग्र
ग्रहाहन्सर्ववत्तिष्ठति २ इममाह ज्ञात्वाप्यसर्पोऽसंयथाकंपनमुंचति विध्वस्ता
खिलमोहोपिमोहंकार्यंतथात्मवित् अस्यजीवन्मुक्तस्यदेहधारणंलोकस्यो
पकारार्थंइतिश्रुतिरपि आप्तानाद्यादनेस्वशरीरेणोपभोगाप्यायिलोकस्यो
पकारार्थायपरिग्रहेत्तभोगाकव लोकोपकारःकिं उपकारस्त्रिविधः तत्क
थमित्थं दर्शनभजनसंभाषणाच्चेति दर्शनेनपापक्षयोभवति भजनेनश्रेयउ
त्तरोत्तरवृद्धिः संभाषणेनमोक्षोभवति एवंनित्यशुद्धबुद्धमुक्तसत्यस्वभाव
स्वरूपोहं एवंविधोबोधः आचार्यप्रसादात् अज्ञानान्नातप्रबुद्धः संसारवि
मुक्तोभवति श्रुतिरपि आचार्यवान्हिपुरुषोवेद आचार्याद्धैवविद्याविदिता
तरतिशोकमात्मवित् भिद्यतेहृदयग्रंथिश्छिद्यन्तेसर्वसंशयाः क्षीयन्तेचा
स्यकर्माणितस्मिन्दृष्टेपरावरे ज्ञानाग्निःसर्वकर्माणिभस्मसात्कुरुतेतथा
ब्रह्मविदाप्नोतिपरंब्रह्मविद्ब्रह्मैवभवति इदानीं अन्यउपासनेदोषमाह अ
न्यविद्यांक्रियाउपदिशंतिकालांतरेअनित्यफलंसंदर्शयंति श्रुतिरपि सर्वे

विद्याः क्रियायाः पराः यदि क्रियाफलमोक्षो भवेत् अनित्यत्वं प्रसज्येत घटवत्
१४ स्वर्गादिवच्च न च यदिति अत्रापि एवं ब्रूयुः श्रुतिरप्याह तद्यथेह कर्मजितो लोकः क्षी-
यते एवमेवामुत्र पुण्यजितो लोकः क्षीयते इति स्मृतिरपि "क्षीणे पुण्ये म-
र्त्यलोकं विशन्ति" अचरणत्वेऽदुःखफलत्वात् दुःखं भोगान्ते पतनं दुःखं ए-
वमन्यविद्योपासने दुःखमाप्नोति श्रुतिरपि "मृत्योः स मृत्युमाप्नोति य
इह नानेव पश्यति" योऽन्यां देवतामुपास्ते स देवानां पशुरिति श्रुत्यो सावहम-
न्योऽस्मीत्युपास्ते योऽन्यां देवतां न स वेद यथा पशुः स देवानां यथा पशुरिति तस्माद-
न्यां विद्यां परित्यज्य ईशामध्यात्मविद्यामाश्रयेत सा विद्या कीदृशी अत्र भ-
गवतोक्तं राजविद्या राजगुह्यं पवित्रमिदमुत्तमं प्रत्यक्षावगमं धर्म्यं सुसुखं क-
र्तुमव्ययं किंच यथा अग्निहोत्रादीनां स्वर्गादिफलं दर्शयन्ति श्रुतिः
तथा ब्रह्मविद्याविज्ञानादपि परमपुरुषार्थं दर्शयन्ति श्रुतिः ब्रह्मविद्यानं-
तरं मोक्षं प्रदर्शयन्ति यथैकार्यं निरवारयन्ति ब्रह्मविदाप्नोति परं इति वेदा-
नुशासनं वेदानुशासनमिति अपपाठानां युक्तानि भाव्यवद्यानां तात्त्विका-
नामुपयुग्मानामिनां पत्तां क्रियां न प्रकाशयेत् यस्य देवे परा भक्तिर्यथा देवे
तथा गुरौ तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः इति श्रुतेः इति सां-
ख्यवेदान्तशास्त्रप्रक्रियायां श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरकृतौ

वहिरंमुखांतःप्रवणमध्यात्मविद्योपदेशविधिः संपूर्णम्॥ शुभमस्तु ॥

२५

15

पं. २५ नं० १३३

इत्यध्यात्मविद्योपदेशविधिः समाप्तः
२७-११-२००१

प० सं० २५

नं. स्याहीत 1200